# छत्तीसगढ़ माध्यमिक शिक्षा मण्डल, रायपुर
## शैक्षणिक सत्र 2021–22 माह सितम्बर
## असाइनमेंट – 02
## कक्षा – बारहवीं
## विषय – संस्कृत

**पूर्णांक–20**

**निर्देश :– दिए गए सभी प्रश्नों को निर्देशानुसार हल कीजिए।**
**Instruction :– Attempt all the question as per given instructions.**

प्रश्न 1. अधोलिखितं श्लोकं पठित्वा प्रदन्तप्रश्नान् संस्कृतेन उत्तरत (केषांश्चिद् पञ्चानाम्)

प्रजानामेव भत्यर्थं स ताभ्यो बलिमग्रहीत।
सहस्रगुणभुत्स्रमादन्ते हि रसं रविः।।
ज्ञाने मौनं क्षमा शक्लौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।। **अंक–5×1=5**

प्रश्नः (i) कः प्रजानां भूत्यर्थं ताभ्यो बलिमग्रहीत्?
(ii) दिलीपस्य शक्तौ का आसीत्?
(iii) 'रविः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?
(iv) 'अग्रहीत्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?
(v) 'दोषाः' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?
(vi) 'प्रशंसा' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?

प्रश्न 2. अधोलिखितं गद्यांशं पठित्वा हिन्दी भाषया अनुवादं कुरुत। **अंक–5**

संवृत्ते किञ्चिदन्धकारे भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमव्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत् – "कः कोऽत्रभोः?" इति।

प्रश्न 3. रुग्णतायाः कारणात् अवकाशप्राप्तये स्वप्राचार्यं प्रार्थनापत्रं लिखत। **अंक–5**

प्रश्न 4. भवतः नाम रामः अस्ति। भवान् छात्रावासे च वसति। सिरपुरे शैक्षिक–यात्रायै गन्तुम् इच्छति।
धनप्रेषणार्थं पितरं प्रति लिखिते पत्रे मञ्जूषातः उचित शब्दान चित्वा रिक्तस्थानानि पूरयत–
(निवेदयामि, प्रियपुत्रः शैक्षिकयात्रायाः, पञ्चाशतं रायपुरतः, शरदवकाशे, सीतापुरं, जनन्यै, उत्तरपत्राणि, पितृमहाभागाः।)

**क्रमशः .......02**

आजादछात्रावासः
(i) ....................

परमादरणीयाः (ii) ------------------
सादरं प्रणमामि।

सविनयं (iii) ................................यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम (iv) ............................ शोभनानि अभवन्।

अस्मिन् (v) ............................... अहं गृहं न आगमिष्यामि। यतः विद्यालयेन एकस्याः (vi) ......................... प्रबन्धः कृतः। एषा यात्रा सिरपुरस्य दर्शनाय आयोजिता अस्ति। यात्रायै (vii) ......................... रुप्यकाणि प्रेषयन्तु भवन्तः।

शेषं सर्वं कुशलम्। मम (viii) ...................... अग्रजाय च सादरं प्रणामाः।

भवदीयः (ix) .................................
रामः
डॉ0 कृष्णचन्द्रः
140 वैदेहीकुटीरम्
(x) ...........................................

**अंक – $\frac{1}{2} \times 10 = 5$**